॥ वाल्मीकि रामायण॥

६ युद्धकाण्ड

अध्याय ८७

महोदरमहापार्श्वौ हतौ दृष्ट्वा तु राक्षसौ ।
तस्मिंश्च निहते वीरे विरूपाक्षे महाबले ॥ १॥

आविवेश महान्क्रोधो रावणं तु महामृधे ।
सूतं सञ्चोदयामास वाक्यं चेदमुवाच ह ॥ २॥

निहतानाममात्यानां रुद्धस्य नगरस्य च ।
दुःखमेषोऽपनेष्यामि हत्वा तौ रामलक्ष्मणौ ॥ ३॥

रामवृक्षं रणे हन्मि सीतापुष्पफलप्रदम् ।
प्रशाखा यस्य सुग्रीवो जाम्बवान्कुमुदो नलः ॥ ४॥

स दिशो दश घोषेण रथस्यातिरथो महान् ।
नादयन्प्रययौ तूर्णं राघवं चाभ्यवर्तत ॥ ५॥

पूरिता तेन शब्देन सनदीगिरिकानना ।
सञ्चचाल मही सर्वा सवराहमृगद्विपा ॥ ६॥

तामसं सुमहाघोरं चकारास्त्रं सुदारुणम् ।
निर्ददाह कपीन्सर्वांस्ते प्रपेतुः समन्ततः ॥ ७॥

तान्यनीकान्यनेकानि रावणस्य शरोत्तमैः ।
दृष्ट्वा भग्नानि शतशो राघवः पर्यवस्थितः ॥ ८॥

स ददर्श ततो रामं तिष्ठन्तमपराजितम् ।
लक्ष्मणेन सह भ्रात्रा विष्णुना वासवं यथा ॥ ९॥

आलिखन्तमिवाकाशमवष्टभ्य महद्धनुः ।
पद्मपत्रविशालाक्षं दीर्घबाहुमरिन्दमम् ॥ १०॥

वानरांश्च रणे भग्नानापतन्तं च रावणम् ।
समीक्ष्य राघवो हृष्टो मध्ये जग्राह कार्मुकम् ॥ ११॥

विस्फारयितुमारेभे ततः स धनुरुत्तमम् ।
महावेगं महानादं निर्भिन्दन्निव मेदिनीम् ॥ १२॥

तयोः शरपथं प्राप्य रावणो राजपुत्रयोः ।
स बभूव यथा राहुः समीपे शशिसूर्ययोः ॥ १३॥

रावणस्य च बाणौघै रामविस्फरितेन च ।
शब्देन राक्षसास्तेन पेतुश्च शतशस्तदा ॥ १४॥

तमिच्छन्प्रथमं योद्धुं लक्ष्मणो निशितैः शरैः ।
मुमोच धनुरायम्य शरानग्निशिखोपमान् ॥ १५॥

तान्मुक्तमात्रानाकाशे लक्ष्मणेन धनुष्मता ।
बाणान्बाणैर्महातेजा रावणः प्रत्यवारयत् ॥ १६॥

एकमेकेन बाणेन त्रिभिस्त्रीन्दशभिर्दश ।
लक्ष्मणस्य प्रचिच्छेद दर्शयन्पाणिलाघवम् ॥ १७॥

अभ्यतिक्रम्य सौमित्रिं रावणः समितिञ्जयः ।
आससाद ततो रामं स्थितं शैलमिवाचलम् ॥ १८॥

स सङ्क्रुद्धो राममासाद्य क्रोधसंरक्तलोचनः ।
व्यसृजच्छरवर्णानि रावणो राघवोपरि ॥ १९॥

शरधारास्ततो रामो रावणस्य धनुश्च्युताः ।
दृष्ट्वैवापतिताः शीघ्रं भल्लाञ्जग्राह सत्वरम् ॥ २०॥

ताञ्शरौघांस्ततो भल्लैस्तीक्ष्णैश्चिच्छेद राघवः ।
दीप्यमानान्महावेगान्क्रुद्धानाशीविषानिव ॥ २१॥

राघवो रावणं तूर्णं रावणो राघवं तथा ।
अन्योन्यं विविधैस्तीक्ष्णैः शरैरभिववर्षतुः ॥ २२॥

चेरतुश्च चिरं चित्रं मण्डलं सव्यदक्षिणम् ।
बाणवेगान्समुदीक्ष्य समरेष्वपराजितौ ॥ २३॥

तयोर्भूतानि वित्रेषुर्युगपत्सम्प्रयुध्यतोः ।
रौद्रयोः सायकमुचोर्यमान्तकनिकाशयोः ॥ २४॥

सन्ततं विविधैर्बाणैर्बभूव गगनं तदा ।
घनैरिवातपापाये विद्युन्मालासमाकुलैः ॥ २५॥

गवाक्षितमिवाकाशं बभूव शूरवृष्टिभिः ।

महावेगैः सुतीक्ष्णाग्रैर्गृध्रपत्रैः सुवाजितैः ॥ २६ ॥

शरान्धकारं तौ भीमं चक्रतुः परमं तदा ।
गतेऽस्तं तपने चापि महामेघाविवोत्थितौ ॥ २७ ॥

बभूव तुमुलं युद्धमन्योन्यवधकाङ्क्षिणोः ।
अनासाद्यमचिन्त्यं च वृत्रवासवयोरिव ॥ २८ ॥

उभौ हि परमेष्वासावुभौ शस्त्रविशारदौ ।
उभौ चास्त्रविदां मुख्यावुभौ युद्धे विचेरतुः ॥ २९ ॥

उभौ हि येन व्रजतस्तेन तेन शरोर्मयः ।
ऊर्मयो वायुना विद्धा जग्मुः सागरयोरिव ॥ ३० ॥

ततः संसक्तहस्तस्तु रावणो लोकरावणः ।
नाराचमालां रामस्य ललाटे प्रत्यमुञ्चत ॥ ३१ ॥

रौद्रचापप्रयुक्तां तां नीलोत्पलदलप्रभाम् ।
शिरसा धारयन्रामो न व्यथां प्रत्यपद्यत ॥ ३२ ॥

अथ मन्त्रानपि जपन्रौद्रमस्त्रमुदीरयन् ।
शरान्भूयः समादाय रामः क्रोधसमन्वितः ॥ ३३ ॥

मुमोच च महातेजाश्चापमायम्य वीर्यवान् ।
ताञ्शरान्राक्षसेन्द्राय चिक्षेपाच्छिन्नसायकः ॥ ३४ ॥

ते महामेघसङ्काशे कवचे पतिताः शराः ।
अवध्ये राक्षसेन्द्रस्य न व्यथां जनयंस्तदा ॥ ३५ ॥

पुनरेवाथ तं रामो रथस्थं राक्षसाधिपम् ।
ललाटे परमास्त्रेण सर्वास्त्रकुशलोऽभिनत् ॥ ३६ ॥

ते भित्त्वा बाणरूपाणि पञ्चशीर्षा इवोरगाः ।
श्वसन्तो विविशुर्भूमिं रावणप्रतिकूलताः ॥ ३७ ॥

निहत्य राघवस्यास्त्रं रावणः क्रोधमूर्छितः ।
आसुरं सुमहाघोरमन्यदस्त्रं समाददे ॥ ३८ ॥

सिंहव्याघ्रमुखांश्चान्यान्कङ्ककाक मुखानपि ।
गृध्रश्येनमुखांश्चापि सृगालवदनांस्तथा ॥ ३९ ॥

ईहामृगमुहांश्चान्यान्व्यादितास्यान्भयावहान् ।
पञ्चास्याँल्लेलिहानांश्च ससर्ज निशिताञ्शरान् ॥ ४० ॥

शरान्खरमुखांश्चान्यान्वराहमुखसंस्थितान् ।
श्वानकुक्कुटवक्त्रांश्च मकराशीविषाननान् ॥ ४१ ॥

एतांश्चान्यांश्च मायाभिः ससर्ज निशिताञ्शरान् ।
रामं प्रति महातेजाः क्रुद्धः सर्प इव श्वसन् ॥ ४२ ॥

आसुरेण समाविष्टः सोऽस्त्रेण रघुनन्दनः ।
ससर्जास्त्रं महोत्साहः पावकं पावकोपमः ॥ ४३ ॥

अग्निदीप्तमुखान्बाणांस्तथा सूर्यमुखानपि ।
चन्द्रार्धचन्द्रवक्त्रांश्च धूमकेतुमुखानपि ॥ ४४ ॥

ग्रहनक्षत्रवर्णांश्च महोल्का मुखसंस्थितान् ।
विद्युज्जिह्वोपमांश्चान्यान्ससर्ज निशिताञ्शरान् ॥ ४५ ॥

ते रावणशरा घोरा राघवास्त्रसमाहताः ।
विलयं जग्मुराकाशे जग्मुश्चैव सहस्रशः ॥ ४६ ॥

तदस्त्रं निहतं दृष्ट्वा रामेणाक्लिष्टकर्मणा ।
हृष्टा नेदुस्ततः सर्वे कपयः कामरूपिणः ॥ ४७ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com